*This contains 12 pages*

# केन्द्रीय विद्यालय संगठनम् - क्षेत्रीय कार्यालयः - एरणाकुलम्

## सङ्कलनात्मकं मुल्याङ्कनम् (द्वितीयसत्रम्)

**SUMMATIVE ASSESSMENT II**

**C**

**E10122**

अवधिः होरात्रयम्

Time Allowed : 3 hrs

## *संस्कृतम् (संप्रेषणात्मकम्)*

**COMMUNICATIVE SANSKRIT**

पूर्णाङ्काः 90

Maximum Marks : 90

*दशमी कक्षा*

---

| | | | |
|---|---|---|---|
| खण्डः क | - | अपठित - अवबोधनम | 10 अङ्काः |
| Section A | - | Unseen Reading Comprehension | |
| खण्डः ख | - | रचनात्मककार्यम् | 15 अङ्काः |
| Section B | - | Writing Skills | |
| खण्डः ग | - | अनुप्रयुक्त व्याकरणम | 30 अङ्काः |
| Section C | - | Applied Grammar | |
| खण्डः घ | - | पठित - अवबोधनम् | 35 अङ्काः |
| Section D | - | Reading Comprehension | |

*निर्देशाः*

i. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाःसन्ति।
This Question paper has four sections

ii. प्रतिखण्डम् उत्तराणि प्रथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि ।
The answers have to be written in a separate answer booklet.

iii. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
The answers to each section must be written at one place.

iv. प्रश्न पत्रे उत्तराणि न लेखनीयानि
Don't write answers in the Question paper

v. प्रश्नसंख्या प्रश्नपत्रानुसारम् एव लेखनीया
Write The Question number according to the question paper

vi. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि
Answer all the questions in sanskrit.

## *क) अपठितावबोधनम्*

**I** *अधोलिखितमनुच्छेदं पठित्वा तदाधारित प्रश्नान् उत्तरत-*

कश्चन ग्रामः। ग्रामसमीपे महद् वनम् आसीत्। तस्माद् वनाद् यदा-कदाऽपि सिंहगर्जनं श्रूयते स्म। तस्मात् जनाः जानन्ति स्म यद् वने सिंहः वसति इति। कञ्चित् कालं यावत् सिंहगर्जनं न श्रूतम्। तदा जनाः चिन्तितवन्तः प्रायशः सिंहः कुत्राऽपि गतवान् इति। परन्तु अनन्तरकाले कदापि सिंहस्य गर्जनमेव न श्रुतम् तदा जनाः निर्णीतवन्तः सिंहः मृतः इति। एवमेव बहोः कालात् संस्कृतसिंहानां गर्जनमेव न श्रुतम् इति कारणतः अद्य संस्कृतविषये अपि 'संस्कृतं निर्जीवम्' इति आक्षेपः श्रूयते।

यद्यपि आङ्गलशासनकाले अनन्तरं च संस्कृतशिक्षा मुख्यधारायाः पाश्ववर्तितां नीता तथापि अद्यत्वे भारतीयसमाजस्य हृदये संस्कृतं प्रति कापि निष्ठा वर्तते। राष्ट्रस्य ऐकमत्यसम्पोषिका भवति इयं भाषा। अतः एतस्याः भाषायाः अध्ययनम् - अध्यापनं, प्रचारप्रसारः च राष्ट्रहित दृष्ट्या अवश्यं भवेत्।

**1** *एकपदेन उत्तरं लिखत* **(½x4=2)**

1. कस्य समीपे वनम् आसीत्।
2. सिंहः कुत्र प्रतिवसति स्म।
3. सिंहः मृतः इति के निर्णीतवन्तः।
4. कस्य संस्कृतं प्रति कापि निष्ठा वर्तते।

**2** *पूर्णवाक्येन उत्तरं लिखत* 2x2=4

5. का मुख्यधारायाः पाश्ववर्तितां नीता।
6. राष्ट्रहित दृष्टया किं अवश्यं भवेत्।

**3** *निर्देशानुसारं समुचितमुत्तरं विकल्पेभ्यः चित्वा लिखत* ½x4=2

1. *'चिन्तितवन्तः'* इत्यत्र कः प्रत्ययः।

   अ) क्त  आ) क्तवतु  इ) मतुप्  ई) इनि

2. *‘दूरे’* इत्यस्य अनुच्छेदे प्रयुक्तं विलोमपदं किम्

अ) महद्   आ) समीपे   इ) काले   ई) न

3. *‘जानन्ति’* इति क्रियापदस्य कर्तृपदं अनुच्छेदे किं प्रयुक्तम्

अ) सिंहः   आ) वनम्   इ) तस्मात्  ई) जनाः

4. *‘इयं भाषा’* इत्यत्र  किं विशेषणम्

अ) इयं आ) अयं  इ)भाषा  ई) किमपि न

## *ख) रचनात्मकम् कार्यम्*

**II** *भवती वर्णा। भवत्याः मित्रं कृपा विवेकानन्दस्य* **150th** *वार्षिकसमारोहे प्रचलितायां प्रतियोगितायां द्वितीयस्थानं प्राप्तवती। तस्यै लिखिते वर्धापनपत्रे रिक्तस्थानानि पूरयित्वा पुनः लिखत-* (½x10=5)

कासरगोड़तः

07.10.2012

प्रिय (1)_______

(2)_______

भवत्याः पत्रं अद्य (3)_______ । महान् सन्तेषः। भवती (4)_______ प्रसङ्गस्पर्धायां (5)_______ स्थानं प्रप्तवती इति ज्ञात्वा अस्माकं पक्षतः (6)________ वर्धापनानि। कृपया (7) _______ ।आगामिनि मासे प्रचलन्त्यां प्रतियोगितायां भवती प्रथमं (8)_______प्राप्नोतु इति मे (9) _________

भवदीयं मित्रम्

(10)______ ।

*(संस्कृत, स्वीकरोतु, वर्णा, कृपा, स्थानं,*
*अशंसाः, नमस्ते, शतशः, द्वितीय, लब्धं)*

**III** *अधोलिखितं चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतभाषया लिखत- कानिचित् पदानि मञ्जूषायां प्रदत्तानि।* (2x5=10)



*क्रीडास्पर्धा, मुख्यातिथिमहोदयः,*
*पुरस्कारवितरणाय।, ध्वनिविस्तारयन्त्रम्,*
*सञ्चालकः।, सोत्साहं, प्रथमस्थानम्, कठिनप्रयत्नः*

## ग) अनुप्रयुक्तव्याकरणम्

**IV** *अधोलिखितवाक्येषु रेखाङ्कित पदानां समुचितं सन्धिं सन्धिविच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत-* (1x5=5)

1. सह *नौ अवतु* इति प्रार्थनामत्रः अस्ति।

   अ) नाबवतु आ) नाववतु इ) नौववतु ई) नानवतु।

2. *'इत्युक्त्वा'* मुनिः अगच्छत्-

   अ) इत्य + उक्त्वा आ) इति + उक्त्वा

   इ) इत्यु + उक्त्वा ई) इत्युम् + त्वा

3. गृहे अधुना न *कः* + *अपि* अस्ति।

   अ) कऽपि आ) कौपि इ) कोऽपि ई) कापि

4. छात्राः गुरुं प्रति अवदन् *'नमस्ते'*

अ) नमस्त् + ते आ) नम + स्ते इ) नमः + स्ते ई) नमः + ते

5. ईश्वरः *जगत्* + *आनन्दकारकः* अस्ति।

अ) जगतानन्दकारकः आ) जगदानन्दगारकः

इ) जगदानन्दकारकः ई) जगधानन्दकारकः

**V)** *अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्त विकल्पेभ्यः चित्वा लिखत* (1x5=5)

1. *दुष्टबुद्धिः* तस्य वाक्यानि तिरस्करोति

अ) दुष्टं बुद्धिः यस्य सः आ) दुष्टः बुद्धिः यस्य सः

इ) दुष्टौ बुद्धी यस्य सः ई) दुष्टा बुद्धिः यस्य सः

2. *पितरौ* पूजनीयौ भवतः।

अ) माता च माता च आ) पिता च पिताः च

इ) मातरौ पितरौ च ई) माता च पिता च

3. सः *गुरोः समीपं* गच्छति

अ) उपगुरुं आ) उपगुरु

इ) अगुरो ई) गुरुम्

4. *रामः लक्ष्मणः च* वनम् अगच्छताम्

अ) रामौ लक्ष्मणौ आ) रामलक्ष्मणौ

इ) रामसीते ई) सीता रामौ।

5. राजा *अनुमृगं* धावति।

अ) मृगयोग्यम् आ) मृगस्य पश्चात्

इ) अनुमृगः ई) किमपि न

**VI** *अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत।* (1x5=5)

1. दानशालासु *वि+चर्+शत्* सः राजा अचिन्तयत्।

अ) विचरन्ति आ) विचरशत्

इ) विचरन् ई) विचरन्तः

2. प्रचुरमणिमाणिक्यानां आभया *भास्* + *शानच्* निजगृहं दृष्ट्वा तौ दम्पती अतिष्ठताम्।

अ) भासते आ) भासन्

इ) भासंमानः ई) भासमानं।

3. बालः *बाला* च आगच्छन्तं आचार्यं प्रणमतः।

अ) बाला + टाप् आ) बाल + टाप्

इ) बा + लाटाम् ई) बालाः

4. प्रकृतेः *रमणीय* + *तल्* मनोरमा अस्ति

अ) रम् + अनीयर आ) रमणीयता

इ) रमणीयताम् ई) रमणीयतल्

5. विद्यायाः *महत्* + *त्वम्* को न जानाति।

अ) महता आ) महत् त्वम्

इ) महलत्वम् ई) महत्वम्

**VII** *प्रदत्तविकल्पेभ्यः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत* **(1x5=5)**

1. _______ वार्ताः श्रूयन्ताम्

अ) न आ) सम्प्रति

इ) यत् तत्र ई) हयः।

2. पर्युषितम् अन्नं _______ खाद।

अ) मा आ) हि

इ) अपि ई) च

3. _______ वसन्तागमनं भवति तदा कोकिलः कूजति

अ) कदा आ) यदा

इ) सर्वदा ई) नैकदा

4. चौरः गृहात् ________ अगच्छत्।

अ) पूरतः आ) अग्रतः

इ) सह ई) बहिः

5. *'मन्त्री ________ आगच्छति?'* इति बालिका अपृच्छत्

अ) सह आ) तर्हि

इ) किमर्थम् ई) श्वः।

**VIII** *अधोलिखितवाक्येषु अङ्कानां स्थाने संस्कृत संख्यावाचकविशेषणपदानि प्रयुज्य उत्तराणि लिखत।* **(1x5=5)**

मम विद्यालये (i) (30)__________ अध्यापकाः (ii) (40) _______ अध्यापिकाः च सन्ति। (iii) (1) ________ क्रिडाक्षेत्रं (iv) (3) ________ विज्ञानप्रयोगशालाः च सन्ति। विद्यालयस्य पुरतः एव (v) (2) _______ वृक्षौ भवतः।

**IX** *रेखाङ्कितपदं संशोध्य पुनः लिखत* (1x5-5)

1) भवान् कुत्र गच्छसि।

2) श्वः सः दिल्लीं गच्छति

3) दातारः धनं यच्छति

4) रामेण सह सीता वनं गच्छतः

5) अधुना वयं संस्कृतपरीक्षां लिखामि

## घ) पठितावबोधनम्

**X** *अधोलिखितं गद्याशं पद्याशं नाट्याशं च पठित्वा तदाधारित प्रश्नान् उत्तरत-*

*अ) गद्यांशः*

कालोऽहम्। अहं खलु कालः। विश्वस्य आत्माऽहम्। कलयामि गणयामि जगतः आयुः प्रमाणम् सततं चक्रवत् परिवर्तमानः भूतं वर्तमानं भविष्यदपि च वीक्षमाणः अहमेव साक्षी जगतः उत्पत्तेः विकासस्य प्रलयस्य च। इदं जगत् तु पुनः पुनः जायते विलीयते च परमहं सर्वदा विद्यामानोऽस्य सर्वं क्रियाकालापं पश्यामि।

*एकपदेन उत्तरं लिखत* **(½x2=1)**

1. अत्र कः वक्ता?
2. जगतः आयुः कः गणायति।

*पूर्णवाक्येन उत्तरं लिखत* **(1x2=2)**

1. कालः जगतः कस्य कस्य साक्षी भवति।
2. सर्वं क्रियाकलापं कः पश्यति।

*निर्देशानुसारं उचितमुत्तरं विकल्पेभ्यः चित्वा लिखत।* **(½x4=2)**

1. *'विद्यमानः'* इत्यत्र प्रकृतिप्रत्यय विभागः क्रियताम्।

अ) विद्या + शतृ  आ) विद् + शानच्

इ) वि + द्य + शत्  ई) विद्या + शानच्।

2. *'आयुः'* इत्यत्र किं लिङ्गम्

अ) पुल्लिङ्गम् आ) स्त्रीलिङ्गम्

इ) नपुंसकलिङ्गम् ई) न कोपि

3. *'साक्षी'* इत्यत्र कः प्रत्ययः

अ) ङीप् आ) ङीष्

इ) मतुप् ई) इनि

4. *'परमहम् सर्वदा'* अत्र अहं कस्मै प्रयुक्तम्।

अ) यमराजाय आ) कालाय

इ) जगते ई) आयुषे

*आ) पद्यांशः*

त्यक्त्वा धर्मप्रदां वाचं
परुषां योभ्युदीरयेत्।
परित्यज्य फलं पक्वम्
भङ्क्तेऽपक्वं विमूढधीः।।

*एकपदेन उत्तरं लिखत* (½x2=1)

1. कः धर्मप्रदां वाचं त्यजति।
2. कः अपक्वं फलं भुङ्क्ते।

*पूर्णवाक्येन उत्तरं लिखत* (1x2=2)

1. कीदृशीं वाचं वदेत्।
2. पक्वं फलं कः परित्यजति।

*निर्देशानुसारम् समुचितमुत्तरं विकल्पेभ्यः चित्वा लिखत-* **(½x4=2)**

1. *'विमूढधीः'* इत्यस्य विग्रहवाक्यं भवति

अ) विमूढा धीः यस्य सः आ) विमूढं धी

इ) विमूढः धीः या ये ई) किमपि न

2. अभ्युदीरयेत् इत्यत्र कः धातुः

अ) ईर्   आ) अभ्

इ) उत्   ई) विधिलिङ।

3. *'परित्यज्य'* इत्यर्थे किं पदं श्लोके प्रयुक्तम्

अ) त्यक्त्वा   आ) पक्वम्

इ) भुडन्ते   ई) अभ्युदीरयेत्।

4. *'पक्वं'* इत्यस्य किम् विलोमपदं श्लोके प्रयुक्तम्

अ) धर्मप्रदां   आ) भुड्म्ते।

इ) अपक्वम्   ई) त्यक्त्वा

*इ) नाट्यांशः*

युधिष्ठिरः - सम्प्रति आश्वस्तः अस्मि। मन्ये सः ब्रह्मास्त्रप्रयोगं न करिष्यति।

श्रीकृष्णः - तर्हि न जानासि तस्य मनोवृत्तिम्। पितुः उपदेशेन असन्तुष्टः सः (द्रौणिः) एकदा द्वारकापुरीम् आगच्छत्। ब्रह्मास्त्रम् दत्वा सः सुदर्शन चक्रम् अवाञ्चत्।

युधिष्ठिरः (साश्चर्यम्) - कथं चक्रम् इति।

श्रीकृष्णः - आम् मया कथितम्। नाहं त्वत्तः ब्रह्मास्त्रम् इच्छामि। यदि त्वं मम गदां शक्तिं धनुः चक्रं च इच्छसि तुभ्यं ददामि।

युधिष्ठिरः - ततस्ततः

*एकपदेन उत्तरं लिखत* **(½x2=1)**

1. कः अधुना आश्वस्तः
2. किं दत्वा द्रौणिः सुदर्शनचक्रं स्वीकर्तुं अवाञ्चत्

*पूर्णवाक्येन उत्तरं लिखत* **(1x2=2)**

1. श्रीकृष्णः द्रौणिं किमवदत्।
2. कः पितुः उपदेशेन असन्तुष्टः भवति

*निर्देशानुसारं विकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत* **(½x4=2)**

1. *'मन्ये'* इति क्रियापदस्य कर्ता कः

अ) अहं	आ) युधिष्टिरः

इ) सः	ई) न

2. *'तुभ्यं ददामि'* तुभ्यं इति कस्मै प्रयुक्तम्।

अ) द्रोणाय	आ) द्रोणपुत्राय

इ) कृष्णाय	ई) युधिष्ठिराय।

3. *'करिष्यति'* इत्यत्र कः लकारः

अ) लट्	आ) लङ्

इ) लृट्	ई) लोट्

4. *'असन्तुष्टः सः'* अनयोः विशेष्यं किम्

अ) असन्तुष्टः	आ) सः

इ) एकदा	ई) उपदेशेन।

**XI** *अधोलिखितयोः भावार्थं उचितपदानि चित्वा पूरयत-* (½x8=4)

क्रन्दनं वर्धते तस्य नान्तं समाधिगच्छति।

व्यसनं प्राप्य यो मोहात् केवलं परिदेवयेत्।।

यः दुःखं ______ केवलं परिदेवयेत् _______ रोदनं वर्धते एव, सः तस्य _____ समाधानमपि _____ कदापि समधिगच्छति।

अधुना रमणीया हि सृष्टिरेषा जगत्पतेः।

जीवाः सर्वेऽत्र मोदन्तां भावयन्तः परस्परम्।।

विश्वकर्तुः एषा _______ सम्प्रति _______ अस्ति। _____ जन्तवः_____ परस्परं भावयन्तः मोदन्ताम्।

| *(तस्य, प्राप्य, सृष्टिः, शोकस्य, विश्वस्मिन्, मनोहरा, न, सर्वे)* |
|---|

**XII** *निम्नलिखितश्लोकस्य अन्वयः मञ्जूषातः समुचितपदं चित्वा पूरयत-* **(1x4=4)**

आयुषः क्षणमेकोऽपि, न लभ्यः स्वर्णकोटिकैः।
सः चेत् निरर्थकं नीतः का नु हानिः ततोधिका।।

अ) ______ एकः क्षणः (क्षणम्) अपि आ) ______ न लभ्यः। स चेत् निरर्थकं इ) _____ ततः अधिका नु हानिः ई) ______ ।

अ) (1) एकः (ii) क्षणः (iii) आयुषः (iv) का।

आ) (1) निरर्थकं (ii) स्वर्णकोटिकैः (iii) हानि (iv) न।

इ) (1) आभुषः (ii) का (iii) नीतः (iv) नु।

ई) (1) का (ii) क्षणः (iii) नु (iv) हानिः

**XIII** *वाक्येषु रेखाङ्कितपदानां उचितं प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत* **(1x4=4)**

1. *साधुवृत्तिं* समाचरेत्
2. *धैर्यवान्* लोके परिभवं न प्राप्नोति
3. संवत्सरे *द्वादश* मासाः भवन्ति।
4. सूर्यस्य प्रकाशः सर्वप्रथमं *इमं* देशं स्पृशति।

**XIV** *अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुनः लिखत।* **(½x8=4)**

1. यदि एवं तर्हि कथं सुपथं परित्यज्य अनेन कुपथेन गन्तुं प्रवृत्तौ इति तेषु उद्दण्डः बालकः अपृच्छत्
2. प्रच्छन्नभाग्यः स्वगृहं 'साधुवृत्तिं समाचेरत्' इति चिन्तयन् अगच्छत्।
3. नतोन्नते विषमे मार्गे कान्श्चित् क्रिडतः बालकान् वीक्ष्य तौ अपृच्छताम्।
4. सखे! यदि मित्रस्थाने मां परिगणयसि तर्हि साधुजनगर्हितं इमं पन्थानं त्यजतु भवान्।
5. दुष्टबुद्धिः प्रच्छन्नभाग्यश्च चौर्यार्थं ग्रामान्तरं गच्छतः स्म।
6. दुष्टबुद्धिः तु सद्वचनानि तिरस्कृत्य चोरार्थम् अगच्छत्
7. इदं वचनं विशेषेण मामेव लक्ष्यीकरोति इति प्रच्छन्नभाग्यः पश्चात्तापपुरस्सरं अचिन्तयत्
8. कथमत्र नतोन्नते विषमे मार्गे क्रीडथ इति तौ क्रीडतः बालकान् पृच्छतः।

**XV** *रेखाङ्कितपदानां प्रसंगानुसारं उचितम् अर्थं चित्वा लिखत-* **(1x4=4)**

1. *अधुना* इदं चित्रं पश्यत-

   अ) सद्य आ) साधु

   इ) सम्प्रति ई) कदा

2. लसासम्प्रदायस्य 'लेसर' इति प्रमुखं *पर्व* अपि फरवरी इति मासे सम्पद्यते।

   अ) पर्वतः आ) उत्सवः

   इ) पक्षाः ई) उत्सवम्।

3. सः *सव्येन* पाणिना चक्रम् गृहीतवान्

   अ) वामहस्तेन आ) दक्षिणहस्तेन

   इ) हस्तद्वयेन ई) अनायासम्

4. कर्तुंशक्यो भवेत् येन स विवेकः इति *ईरितः*।

   अ) कथितः आ) उपविशति

   इ) कदा ई) नैव।

***